International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 12-15
© 2018 IJSR
www.anantaajournal.com
Received: 05-07-2018
Accepted: 06-08-2018

**डा. प्रियव्रतमिश्र:**
सहायकाचार्य:
(व्याकरणविभागे),
श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली पो.बहेडा
जि.दरभंगा, बिहारम्, भारत

**Correspondence**
**डा. प्रियव्रतमिश्र:**
सहायकाचार्य:
(व्याकरणविभागे),
श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली पो.बहेडा
जि.दरभंगा, बिहारम्, भारत

# शब्दाद्वैतवाद:

## डा. प्रियव्रतमिश्र:

### सारांश
व्याकरणशास्त्रस्य माहात्म्यं नाविदितं सचेतसाम्। तत्र च नैके अविदितपूर्वाः विषयाः प्रपञ्चिताः विस्तरेण। शास्त्रस्यास्य मूलं तु स्फोटवादेऽन्तर्निहितं वर्त्तते। तत्र च प्राधान्येन विचार्येते शब्दार्थौ। प्रकृतशोधपत्रे शब्दार्थयोः स्वरूपं तयोरभेदः सयुक्तिकं प्रतिपादितः।

**कुञ्जिशब्दाः** सिद्धः, ग्राह्यत्वम्, ग्राहकत्वम्,स्फोटः

### प्रस्तावना
विदाङ्कुर्वन्तु वेदवेदाङ्गवेदान्तविद्यैकमतयो यतयो विद्वांसो यच्छब्दशास्त्रमिदं न केवलं प्रक्रियाप्रपञ्चेन व्यामोहति लोकमपि तु शब्दब्रह्मण: स्वरूपं स्फोटनिकायञ्च प्रतिपाद्य घोषयति नैजं दर्शनत्वम्।

शब्दो नित्य: स एव ब्रह्मस्वरूप:, संसारोत्पत्तौ शब्द एव कारणं, शब्दस्यैव परिणामोऽयं संसार इति जोघुष्यमाणो हरिराह –

> १शब्दस्य परिणामोऽयमित्याम्नायविदो विदु:।
> छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत ॥

अर्थात् अयं संसार: शब्दस्य परिणाम: इति वेदविदो वदन्ति। एवञ्च शब्द एव संसारस्य मूलभूत:, स च नित्य:, तस्मात् भासमानो योऽर्थ: सोऽपि नित्य: तयो: सम्बन्धश्च नित्य:। किं बहुना य: शब्द: स एवार्थ: यश्चार्थ: स एव शब्द: इति शब्दार्थयो: अद्वैत:। यथा भगवता शङ्कराचार्येण जीवात्मपरमात्मनोरभेदत्वात् तयो: अद्वैतत्वं प्रत्यपादि। अर्थात् य: परमात्मा स एव जीवात्मा यश्च जीवात्मा स एव परमात्मा इति अभेद: द्वयोर्मध्ये प्रतिपादित:, यश्च भेदो लोके दृश्यते स च व्यावहारिकदशायामिति तथैवेहापि शब्दार्थयो: अभेदत्वात् शब्दाद्वैत: इति वैयाकरणसमय:।

२नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥

इति कारिकया भर्तृहरिः शब्दार्थयोः सम्बन्धो नित्य इति प्रतिपादयन् महर्षिणां सम्मततां च प्रत्यपीपदत्।
तत्र सूत्रकृता ३"पृषोदरादीनि यथोपदिष्टम्" इति सूत्रेण यथोपदिष्टस्य पृषोदरादित्वात्साधुत्वाभ्यनुज्ञानात् ४"तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रेण आपो दारा इत्यादिषु लोकावगमाल्लिङ्गवचननियम इव पञ्चाला इत्यादौ संज्ञानं संज्ञा-अवगमस्तत्प्रमाणत्वात् लिङ्गवचननियमो भविष्यतीति,तत् ५"लुपि युक्तिवद्व्यक्तिवचने" इति सूत्रमशिष्यमित्येवं युक्तवद्वचनप्रत्याख्यानात्" ६" लुब्योगाप्रख्यानात्" ७योगप्रमाणे व तदभावेऽदर्शनं स्यात्" इति सूत्राभ्यां पञ्चाला इत्यत्र पञ्चालानां निवासो जनपद इत्येवंभूतस्य योगस्यावयवार्थस्य प्रख्यानमवगमो नास्ति,यदि स्यात्तर्हि सम्प्रति विनापि क्षत्रिययोगं देशविशेषे पञ्चालशब्दव्यवहारदर्शनं यद्भवति तन्न स्यादतो योगानवगमात्तद्धितो नोपपद्यते ततश्च ८"जनपदे लुप्" इति सूत्रमपि न शिष्यमित्येवं लुप्प्रत्याख्यानाच्च व्याकरणात् प्रागपि व्यवस्थितसाधुभावाः शब्दाः सन्तीति सूचितम्। सा च व्यवस्था शब्दानां नित्यत्वे एवोपपद्यते नानित्यत्वे। तथा सति स्वयं कल्पितत्वाच्छब्दानां शारक्रीडादिवदभ्युदयार्थत्वाभावेन व्यवहारमात्रार्थत्वापत्तौ व्यवहारस्य च तैस्तैः पुरुषैः स्व स्वबुद्ध्यनुसारेणाभिनवान् तद्विपरीतान् शब्दानुत्पाद्य निर्वोढुं शक्यत्वेन लोकावगमस्याव्यवस्थितत्वापतौ तदनुरोधेन सूत्रकृदुक्तायाः साधुत्वव्यवस्थाया असामञ्जस्यापातात्।
वार्त्तिककृता ९"सिद्धे शब्दार्थसम्बन्धे" १०" सिद्धं तु नित्यशब्दत्वात्" इति वार्त्तिकाभ्यां, भाष्यकृता च ११" संग्रहे एतत्प्राधान्येन परीक्षितम् नित्यः शब्दः नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम् " सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते" "एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत्सर्वयोगेष्वङ्गं भवति" इत्यादिभाष्यैः कण्ठत एव शब्दानां नित्यत्वमुक्तम्।
तादृशस्योपादानभूतशब्दस्य व्यावहारिकदशायां भेदद्वयं दृश्यते, एकः व्यङ्ग्यः अपरः व्यञ्जकः। अर्थात् एकः शब्दः अपरोऽर्थः। स उपादानवाचकः शब्दस्तस्यार्थरूपेण रज्जोः सर्परूपेणेव विवर्त्तनाद् रज्जुरिव सर्पस्य अर्थस्य विवर्तोपादानं शब्दः, शब्दार्थयोः कार्यकारणभावादेव योऽर्थः स शब्दः यः शब्दः सोऽर्थ इति शब्दार्थयोस्तादात्म्यमिति ध्येयम्। ननु अग्नेर्ढगित्यादौ वाच्यवाचकयोरुभयोरपि एकरूपतया नार्थरूपस्य शब्दे आरोप इति न तत्र अग्निशब्दोऽग्निशब्दस्य विवर्त्तोपादानमिति तस्य उपादानशब्देन ग्रहणं न स्यादिति चेदुच्यते द्वयोः शब्दार्थयोर्भेदमारोप्य संज्ञासंज्ञिभावस्येव उपादानोपादेयभावस्य स्वीकार इत्यदोषात्। यद्वा उपादीयतेऽर्थो बोध्यतेऽनेनेति व्युत्पत्त्या उपादानशब्दोऽत्र बोधकपर एव न विवर्त्तोपादानपर इति न क्षतिः।
तथा च उपादानशब्देषु वाचकशब्देषु उच्चारणेन प्रकाशनीयेषु द्वौ शब्दौ व्यङ्ग्यव्यञ्जकरूपौ लक्ष्येते इति वैयाकरणा आहुः। शब्दद्वयाङ्गीकारे किं मानमिति चेत् शब्दस्वरूपावधारणरूपम् अर्थावधारणरूपञ्च कार्यद्वयमेव तदङ्गीकारे मानम्। एकः स्फोटस्य (यत्र निलीय स्थिताः येनानुगृहीताः श्रूयमाणाः पर्यायाः पर्यायाः शब्दाः अर्थं प्रतिपद्यन्ते सः ) शब्दानां वैखरीरूपाणां निमित्तम्। अयं भावः - श्रूयमाणशब्दानां न वाचकत्वं किन्तु तदभिव्यङ्ग्यस्फोटस्यैवेति स्फोटव्यञ्जकत्वादेव अर्थविवक्षया प्रयोक्ता शब्दान् वैखरीरूपान् प्रयुङ्क्ते इति स्फोटः एषां शब्दानां निमित्तमाध्यमेन वसतीत्यादौ फलस्यापि हेतुत्वदर्शनादिति, अपरः स्थानवाय्वभिघातरूपात्करणव्यापारात् श्रोत्रानुपाती वैखरीरूपः अर्थे प्रयुज्यते अर्थबोधेच्छया स्फोटप्रकाशनाय उच्चार्यते। यद्वा एकः करणव्यापारादुपजातक्रमः वैखरीरूपः श्रोतृबुद्धिस्थस्य अक्रमस्य प्रत्यायकस्य निमित्तं तदुपायत्वात्तस्य,अपरः श्रोतृबुद्धिस्थः अक्रमः स्फोटः अर्थे अर्थबोधाय प्रयुज्यते उपस्थाप्यते तत्रैव प्रत्याय्यप्रत्यायकशक्तेरवस्थानादित्यर्थः। तदुक्तं हरिणा –

१२ द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥

ननु शब्दार्थौ यदि अभिन्नौ तर्हि कथं लोके तावत् अस्य शब्दस्य अयमर्थः इति शब्दार्थयोः भेदो दृश्यते इति चेत् – यथा तेजसः प्रदीपादेः ग्राह्यत्वं ज्ञानविषयत्वं ग्राहकत्वं घटादिविषयकज्ञानजनकत्वं च द्वे ग्राह्यत्वग्राहकत्वरूपे शक्ती स्तः तथैव सर्वशब्दानां एते ग्राह्यत्वग्राहकत्वशक्ती। शक्तीशक्तिमतोरभेदात् नित्यमात्मभूतेऽपि पृथक् भिन्ने इव स्थिते प्रतिभासमाने स्त इत्यर्थः। शब्दः स्वं प्रकाशयन्नेवार्थं प्रकाशयतीति यावत्। यद्यपि घटे ग्राह्यत्वमेव न ग्राहकत्वम् इन्द्रियेषु ग्राहकत्वमेव न ग्राह्यत्वं स्वभावादिति ग्राह्यग्राहकत्वशक्त्योर्विरोध इव भासते तथापि प्रदीपे तयोः समावेशस्यापि दर्शनात् उभयोरेकत्रावस्थानमविरुद्धमिति शब्दे ग्राह्यत्वं ग्राहकत्वञ्च स्वभावादिति तात्पर्यम्। तदुक्तम्-

१३ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगिव स्थिते ॥

शब्दस्य तादृश्यं माहात्म्यं यद् विना शब्दं इह लोके न कश्चिद् व्यवहार उपपद्यते। अत एवोच्यते-

१४न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

अर्थात् सः प्रत्ययः ज्ञानं लोके नास्ति यः शब्दानुगमादृते शब्दानुगमं सम्भवति। सर्वमपि ज्ञानं शब्दविषयकमित्यर्थः। शब्दार्थयोरभेदात् अर्थस्य शब्दप्रकाश्यत्वनियमाद्वेति भावः। सर्वं ज्ञानं शब्देन अनुविद्धमिव संसष्टमिव भासते यज्ज्ञानं यदाकारावग्रहं तत्तद्विषयकमिति व्याप्तेः ज्ञानमात्रस्य शब्दाकारावग्रहतया शब्दविषयकत्वनियम इति भावः। इदमत्रावधेयं सर्वेऽर्थाः सर्वथा सर्वदा सर्वत्र नामधेयान्विताः, नास्ति सोऽर्थो यः कदाचित् क्वचित् कथञ्चिन्नामधेयेन वियुज्यते। प्रतीयमानश्चार्था नामधेयसामानाधिकरण्येनावगम्यन्ते गौरित्यर्थोऽश्व इत्यर्थ इति नामधेयतादात्म्यमर्थानां सिद्ध्यति। न चोपायतया सामानाधिकरण्यं रूपादिप्रतिपत्त्युपाये चक्षुरादौ रूपसामानाधिकरण्याननुभवात्। न च ज्ञायमान उपाय एव उपेयसामानाधिकरण्यमनुभवति चक्षुरादि तु न तथेति वाच्यम् ज्ञायमानोपायस्य धूमस्य वह्निसामानाधिकरण्याननुभवात्। अपि चाशब्दोपायेऽनुमेयादौ न शब्दसम्भेदेनाधिगमो भवेदस्ति तु तस्मात् तैर्नामधेयैः सह समानाधिकरणस्यार्थस्य यतः प्रत्ययस्तस्मान्नामधेयात्मानोऽर्थाः। षड्जादिषु च शब्दाकर्षे अर्थप्रत्ययापकर्षात् तदुत्कर्षे त्वर्थप्रत्ययोत्कर्षात् प्रत्ययस्य च प्रत्येतव्योत्कर्षाधीनोत्कर्षत्वान्नामधेयोत्कर्षेणार्थोत्कर्षोऽर्थस्य तादात्म्यं कथयति। नन्वस्त्वर्थसम्प्रत्ययो नामधेयसामानाधिकरण्येन नत्वेतावता नामधेयात्मना सिद्ध्यति अस्ति हि पुरोवर्त्ति सामानधिकरण्येन रजतप्रत्ययो न चैतावता शुक्ती रजतात्मिका भवति तत्र विसंवादात् शुक्ते रजतात्मकत्वाभावेऽपि इहाविसंवादात् प्रमाणं सन् सामानधिकरण्यानुभवो नामधेयतादात्म्यं साधयत्यार्थानामिति। एवं च वैयाकरणाः निर्विकल्पके ज्ञाने घटघटत्वयोर्भानेन घटादितादात्म्यापन्नः घटशब्दोऽपि भासत इति मन्यन्ते। तथा च तात्पर्यटीकाकृतः "नामरहितमविकल्पकं नास्तीति ये विप्रतिपद्यन्ते तन्मतमपाचिकीर्षुरुपन्यसति भाष्यकारः यावदर्थं वै नामधेयशब्दाः" इति, "तथा च नाविकल्पकं शब्दरहितमस्तीति तात्पर्यार्थः, तथा चाहुः - न सोऽस्ति प्रत्ययो लोके ....इत्यादिः। बालमूकादीनामपि विज्ञानं शब्दानुव्याधवदेवानादिशब्दभावनावशात्" इति च वैयाकरणमतमुपन्यास्थन्। नामसंसर्गविषयकत्वं सविकल्पकलक्षणं वदद्भिः कीर्त्तिदिङ्नागादिभिः सविकल्पके शब्दभानमभ्युगतम् "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेशमव्यभिचारे व्यवसायात्मकं प्रत्यक्षमि"ति प्रत्यक्षलक्षणेऽव्यपदेश्यमिति विशेषणं वदता गौतमेन, शब्दविषयकत्वेन प्रत्यक्षस्य शब्दात्वापत्तिरिति वदता वात्स्यायनेन, तत्रैव सूत्रे शब्दविषयकत्वमेव च शाब्दत्वं न तु शब्दजन्यत्वमिति अशब्दोपायेऽनुमेयादौ न शब्दसम्भेदेनार्थाधिगमो भवेदस्ति तु इति च वाचस्पतिमिश्रेण च शाब्दनुमित्योरपि शब्दभानभ्युपगतम्। स्वं रूपमिति सूत्रे भाष्येऽपि शब्दपूर्वकश्चार्थसंप्रत्यय इत्युक्तम् शब्दविशेषणक इत्यर्थः। मन्त्रे यजुषि च यदुच्यते तत्र तन्त्रशब्दादौ कार्यासम्भवेन मन्त्रादिसहचरितेऽर्थे भविष्यतीति भाष्यप्रतीके साहचर्यं च शब्दानुविद्धस्यैवार्थस्यावगमादिति कैयटेन स्पष्टमेवोक्तम्। युक्तं चैतत् बौद्धार्थस्य बौद्धेन शब्देनाविभागात्तन्मूलाभेदाध्यवसायेन शब्दार्थाकारबुद्धौ जायमानायां स्वाकारस्यापि समर्पणम् इति शब्दस्यापि विषयता। अत एव शब्दे ग्राह्यत्वग्राहकत्वशक्त्योरङ्गीकारः एवमर्थेनापि स्वाकारसमर्पणे तत एव शब्दाकारस्यापि समर्पणमिति सर्वं ज्ञानं शब्दानुविद्धमेव अत एव चक्षुषा दृश्यमानमपि अज्ञातबोधकं पदार्थं " किमिदमिति न जानामीति" व्यवहरन्ति तदुपदेशे च "ज्ञातमिदम्" इति व्यवहरन्ति। अत एव पिकशब्दशक्तिग्रहवतः "अयं कोकिल" इति नानुव्यवसायः तव पिकत्वकोकिलत्वयोरभेदात् मम तु तत्तत्पदभानान्न दोष इति।

एवं च शब्दस्यैतादृशं माहात्म्यं न जातुचित् कश्चित् न्यक्कर्त्तुं शक्नुयात्। वैयाकरणा हि अद्वैतिन इति स्पष्टं प्रतिपादयामासुः नागेशकौण्डभट्टादयः स्व स्व ग्रन्थादौ मङ्गलाचरणे – तथा हि नागेशः परिभाषेन्दुशेखरे – १५"नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधी" इति कौण्डभट्टश्च भूषणे – १६श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् इति। एवमेव वाक्यपदीये भर्तृहरिः-

१७अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

इत्यलं पल्लवितेन।

**सन्दर्भाः**


1. वा.प.ब्र.१२०
2. वा.प.ब्र. २३
3. ३.अ.६-३-१०९
4. अ.१-२-५३
5. अ.१-२-५१
6. अ.१-२-५४
7. अ.१-२-५५
8. अ.४-२-८१
9. म.भा.पस्पशा.
10. तत्रैव
11. तत्रैव
12. वा.प.ब्र.४४

13. वा.प.ब्र.५५
14. वा.प.ब्र.१२३
15. १५.परि.भा.मङ्गलाचरणम्
16. १६.भू.सा. मङ्गलाचरणम्
17. १७. वा.प.मङ्गलाचरणम्

**परामृष्टा: ग्रन्था:**


१. वैयाकरणमहाभाष्यम् - भगवान्पतञ्जलिः,सं.भार्गवशास्त्री चौ.सु.प्र. वाराणसी २००४

२. वाक्यपदीयम् - भर्तृहरिः, सं.सूर्यनारायणसुक्लःचौ.सं.सं,वाराणसी २००६

३. वैयाकरणभूषणसार: - कौण्डभट्टः, सं.चन्द्रिकाद्विवेदी चौ.सं.सं,वाराणसी २०११

४. परिभाषेन्दुशेखर: - नागेशभट्टः, सं.विश्वनाथमिश्रः, चौ.सु.प्र. वाराणसी २००९

५. वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षितः, सं.गिरिधरशर्माचतुर्वेदः, मोतीलालबनारसीदास २००४